श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितं

# ॥ श्री सौभाग्यलक्ष्मी सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सौभाग्यलक्ष्मी सुप्रभातम् ॥

भानुः स्वकीयकिरणैः प्रतिबोधनार्थं
भक्त्योपतिष्ठति सुमैरिव पद्मिनीं त्वाम्।
क्षीरोदशायिभगवद् हृदयाभिरामे
उत्तिष्ठ मङ्गलकरे तव सुप्रभातम् ॥ 1 ॥

त्रैलोक्यमेव भवदीयकटाक्षसिद्ध्यै
नक्तन्दिवं प्रयतते प्रणमत्यजस्रम्।
भानुः कुलाचलशिखामधितिष्ठति द्राक्
उत्तिष्ठ देवि परमे तव सुप्रभातम् ॥ 2 ॥

सन्तोषसौधनिलये शुभहर्म्यवासे
पूर्वाचलस्य शिखरं तरणौ प्रपन्ने।
उद्योगशालिनि जने सुखशायिनि त्वं
उत्तिष्ठ देवि महिते तव सुप्रभातम् ॥ 3 ॥

तूर्णं खगास्तरुलतादिनिवासभाजः
तन्द्रां विहाय च मिथः सुकृतारवाराः।
विष्णोः पदे सततसञ्चरणेन धन्याः
उत्तिष्ठ देवि कमले तव सुप्रभातम् ॥ 4 ॥

भाग्यप्रदानकुशले जनभागधेयात्
बिल्वोज्वले पुरवरे कृतसन्निधाने।
सौभाग्यलक्ष्मि ! जनरक्षणनित्यदीक्षे
उत्तिष्ठ देवि कमले तव सुप्रभातम् ॥ 5 ॥

पुण्यं समस्तजगतां भवति प्रभातं
त्वद्वीक्षणं परमभाग्यवशेन लब्धम्।
यैरेव भाग्यपुरवासिनि कोमलाभे
उत्तिष्ठ देवि कमले तव सुप्रभातम्॥ **6**॥

नाथप्रिये सकललोकनिनादतृप्ते
नादप्रिये सुभगमङ्गलवाद्यजुष्टे।
वत्सप्रिये सकलभक्तबहुप्रिये त्वं
देवि प्रियेण भवतात् तव सुप्रभातम्॥ **7**॥

निद्रासि नैव परमे परमेण साकं
निद्राभिनीतिरथवा भवतु प्रकामम्।
पूर्वोत्थितिं तव गृणन्ति शुभां महान्तः
तस्माद्रमे भवतु संप्रति सुप्रभातम्॥ **8**॥

कल्याणमण्डपतले कृतनिश्चितार्थाः
संबन्धिनः प्रमुदिताः सुकृतारवाराः।
सर्वे मिथः प्रणयभाषणतः प्रबुद्धाः
सौभाग्यलक्ष्मि नियतं तव सुप्रभातम्॥ **9**॥

इत्थं प्रभातसमये तव सुप्रभातं
सौभाग्यलक्ष्मि पुरतः कलयन्ति ये वा।
शान्तिं सुखं सफलतां दृढतां लभन्तां
भक्तिं यशश्च विपुलं भुवि पूर्णकामाः॥ **10**॥

॥ इति श्री सौभाग्यलक्ष्मी सुप्रभातं समाप्तम्॥